CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 832

Title Bhāgavata

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 832 Subject: Puranic lit.

Title: Bhāgavata 8th sk.

Author: – Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 11" by 5" Extent: 111 foll.

Language: Sanskrit Script: Devanagari

Remarks: ——

॥ॐ नमो श्रीभगवते वासुदेवाय॥ ॥ॐ नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजन
मानसनिवासाय हरये॥ अष्टमे अथ चतुर्विंशत्यध्यायैर्मन्वंतरवर्णनं। तत्र तु ते ऋषिदेवेंद्रमूर्त्तयः स्वहरेः सह॥
॥१॥ प्रतिमन्वंतरं चैवमबाध्याः पृथक् पृथक्॥ प्रवर्त्तयंति सद्धर्मान्न्यायेन यंत्या चरंति च। अतो मन्वंतरस्योक्तं स
द्धर्म इति लक्षणं॥ तत्र तु प्रथमे स्वायंभुवः स्वारोचिषः तथा॥ उत्तमस्तामसश्चेति चतुर्मनुनिरूपणं॥३॥ स्वा
यंभुवांतरेऽनंतं तदंतं गुणवर्णनात्॥ स्तुदितः परिपप्रच्छ सर्वमन्वंतरस्थितिं॥४॥ स्वायंभुवस्येति त्रिभिः॥१॥ रा
जोवाच॥ स्वायंभुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः। यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः॥१॥ यत्र वि
श्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिसर्गः॥१॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः। गृ
णंति कवयो ब्रह्मंस्तानि नो वद शृण्वतां॥२॥ महीयसो हरेरत्र क्वचिद्रूपांतरमस्ति तद्रूपेच्छिन
मस्मातिः॥२॥ यद्यस्मिन्नंतरे ब्रह्मन्भगवान्विश्वभावनः। कृतवान्कुरुते कर्त्ता ह्यतीतेऽनागतेऽद्य वा॥
३॥ यस्मिन्नतीते यत्कृतवान् यस्मिन्ननागते यत्कर्त्ता करिष्यति। अथवा वर्त्तमाने यत्कुरुते तद्वदेत्य
न्वयः॥३॥ श्रीशुक उ॥ मनवोऽस्मिन्व्यतीताः षट्कल्पे स्वायंभुवादयः। आद्यस्ते कथितो यत्र दे १

सुनंदायां नद्यां॥ ५ शतरूपापतिः स्वायंभुवमनुः ४

वादीनां च संभवः॥४॥ अस्मिन्कल्पे षण्मनवो व्यतीताः॥४॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः। ध
र्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः॥५॥ तस्य मनोर्दुहित्रोः कपिलयज्ञमूर्त्तिभ्यां पुत्रतां प्राप्तः॥५॥ कृ
तं पुराणं भगवतः कपिलस्यानुवर्णितं। आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह॥६॥ विरक्तः काम
भोगेषु शतरूपापतिः प्रभुः। विसृज्य राज्यं तपसे भार्यो वनमाविशत्॥७॥ सुनंदायां वर्षशतं पदै
केन भुवं स्पृशन्। तप्यमानस्तपो घोरमिदमाह सभारत॥८॥ घोरं दुश्चरं तपस्तप्यमानः। समाधानतु
श्रुतमिदं वक्ष्यमाणं निद्रितोच्छ्वसितवत् विस्मित इव उपदिशन्निव अश्रुतवदन्निव च अष्टभिः श्लोकै
रवाह॥८॥ मनुरुवाच॥ येन चेतयते विश्वं विश्वं चेतयते न यं। यो जागर्त्ति शयानेऽस्मिन्नायं तं वेद वेद सः
॥९॥ येन चिदात्मना विश्वं चेतयते चेतनीभवति। विश्वं तु यं न चेतयते न चेतनीकरोति। स्वत एव चि
द्रूपत्वात्। तत्र हेतुः। अस्मिन् शयाने स्वपिति यो जागर्त्ति साक्षितया वर्त्तते। अहो चित्रं नायं जनस्तं वे
द स तु इमं वेद। तस्येश्वरत्वं दर्शयन् लोकस्य हितमुपदिशति॥९॥ आत्मावास्यमिदं विश्वं यत्किंचिक

वासुदेवो वसत्येषु सर्वत्र तेषु यन्नसदादकु। येनायं तपते विश्वं विश्ववीर्य्यधितस्तपः। येन निमित्तरूपे [illegible] तपते प्रकाशते॥४॥

त्यांजगत।तेनत्यक्तेनभुंजीथामागृधःकस्यस्विद्धनं॥१०॥आत्मनाईश्वरेणआकावास्येस्वसत्ताचैत
न्यान्यांसंव्याप्तं।विश्वंसर्वंजगत्यांलोकेयत्किंचित्जगद्भूतजातं।अतःतेनेश्वरेणयत्त्यक्तंदत्तंधनंतै
नैवभुंजीथाःभोगाननुभवायद्वातेनहेतुना।त्यक्तेनईश्वरार्पणेनभुंजीथाः।स्वार्थंकस्यचित्कस्यचि
दपिधनंमागृधःमाभिकांक्ष॥यद्वा॥कस्यस्विदितिकस्यान्यस्यधनमस्ति।यतोधनाकांक्षाक्रीयत
इत्यर्थः।तथाचश्रुतिः।ईशावास्यमितियथाश्लोकमेव।ननुयदिसर्वंव्याप्नोति।तर्हिचक्षुरादिभिः
किंनज्ञायतेतत्राह॥७॥यंनपश्यतिपश्येत्।नचक्षुर्यस्यनरिष्यति।तंभूतनिलयंदेवंसुपर्णमुप
धावत॥११॥यंपश्येतंजनश्चक्षु॥वानपश्यतिचक्षुराद्यविषयत्वात्।नहिप्रमातारंप्रमाणंविषयी
करोतीतिभावः।तथाचश्रुतिः।चक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रमित्यादिननुतर्हिघटनाशेदेवदत्तस्य २
तद्विषयंचाक्षुषंज्ञानमिवेश्वरस्यापिस्वरूपनष्टं।तद्विषयंज्ञानेननश्येत्।तत्राह॥यस्यतुपश्यतः
चक्षुर्ज्ञानंनरिष्यति।नपश्यति॥तत्तदाकारेणोत्पन्नायाहृत्तेरेवनाशोनस्वतःसिद्धज्ञानस्यनहि

सविद्प्रकाशःप्रकाश्यनाशेनश्यतीतिभावः।सत्तानिनिलयोयस्यतंसर्वंतर्यामिणं।तथापितुपर्णं
शोभनपतत्रंआसंगंउपधावतभजध्वं।तत्स्वरूपस्यनित्यत्वमेवोपपादयन्नाह।नपश्येति॥७॥नयस्या
द्यंतोनमध्यंचस्वपरोनांतरंबहिः।विश्वस्यामूनियद्यस्माद्विश्वंचतदृतंमहत्॥१२॥अन्तनिश्चाद्यं
तादीनतुविश्ववत्तद्दृनिविश्वस्ययस्माद्भवंति।विश्वंचयत्तद्रूपं।अतएवाव्यभिचारित्वात्तत
दृतंसत्यंमहत्परिपूर्णंब्रह्म।ननुविश्वंचेत्तद्रूपंतर्हितस्यकुतोजन्माद्यभावःस्वप्रकाशत्वेवा।क
थंवाजगज्जन्मादिकर्तृत्वेनविकारिणःसत्यत्वंपूर्णत्वंवा।तत्राह॥७॥सविश्वकायःपुरुहूतईश
शःसत्यःस्वयंज्योतिरजःपुराणः।धत्तेस्यजन्माद्यजयात्मशक्त्यातांविद्ययादस्यनिरीहआस्ते॥१३॥
सईशःअजःसत्यःस्वस्वप्रकाशःस्वपुराणश्चनिर्विकारः।विश्वंकायोयस्य।पुरूणिकृतानिना
मानियस्यातथाविधोपि।यतःअस्यविश्वस्यजन्मादिमाययाधत्ते।तांचनित्यसिद्धयाविद्ययाउद
स्यहित्वानिष्क्रियःएवास्ते॥७॥अथाग्रेऋषयःकर्माणीहंतेकर्महेतवे।ईहमानोहिपुरुषःप्रायो

नाहं प्रपद्यते॥१४॥ यस्मादेवमीश्वरः कर्मकृच्चासंस्पृश्यश्च तैः कर्मभिस्तेभ्यस्तस्मादेतो ऋषयोऽप्य
ग्रे आदौ कर्माणि कुर्वन्ति। किमर्थं। अकर्मदित्तवे मोक्षार्थं। प्रायोऽत्तरे कर्मनाशाय हि यस्मात्। न चेह
मानः कर्मनिरवग्रहचित्तः क्रोधाकार इव बध्येतेत्याह। ईहत इति॥ ईहते भगवानीशो
न हि तत्र विषज्जते। आत्मलाभेन पूर्णार्थो नावसीदन्ति येऽनु तं॥१५॥ अतस्तमनुवर्तमाना येऽपि ना
वसीदन्ति न विषज्जन्ते। तदेवं लोकाननुग्रहाय विश्वसृड्यादिः करोति। श्रीरामकृष्णाद्यवतारे
स्ववेदोक्तमप्याचरति तं शरणं व्रजामीत्याह॥ तमिति॥ तमीहमानं निरहङ्कृतं बुधं निराशि
२४ षं पूर्णमनन्यचोदितं। नॄन् शिक्षयन्तं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनं॥१६॥ निजवर्त्म
नरावतारानुरूपो मार्गस्तत्र सम्यक् स्थितं। अतः ईहमानं कर्माण्याचरन्तं तथापि जीववैलक्षण्यमा
ह। निरहङ्कृतं निराशिषं अनन्यचोदितमिति च। निरहङ्कारत्वे हेतुः। बुधं निराशीष्टे हेतुः पूर्णं अ ३
नन्यनियुक्तत्वे हेतुः। प्रभुं। तथापि किमनुष्ठाने हेतुः। नॄन् स्वाचारेण शिक्षयन्तं। तत्किमर्थं। अ

२४

खिलान् धर्मान् भावयति प्रवर्तयतीति तथा तं॥ श्रीशुक उ०॥ इति मन्त्रोपनिषदं व्याहरन्तं समाहि
तं। दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा॥१७॥ समाहितमपि सन्तं मन्त्रोपनिषदं व्याहरन्तं दृ
ष्ट्वासुरोऽवसितवद्विवशमिव मत्वा असुरा यातुधाना क्षुधानिमित्तेन जग्धुं भक्षितुमभ्यद्रवन्॥
तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः। यामैः परिवृतो देवैर्हत्वाशासत्त्रिविष्टपं॥१८॥ यामैः स्व
पुत्रैः। त्रिविष्टपं स्वर्गमपालयत्। स्वयमेवेन्द्रो भूत्वेत्यर्थः। तत्र प्रतिमन्वन्तरं मन्वादयः षडन्येऽन्ये
भवन्ति। तथा हि स्कान्दे शौनकः। मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः। ऋषयोंऽशावतारश्च
हरेः षड्विधमुच्यत इति। तत्राद्यः स्वायम्भुवो मनुः। प्रियव्रतोत्तानपादौ तु पुत्रौ। यामादयो देवाः।
मरीचिप्रमुखाः सप्तर्षयः। यज्ञो हरेरवतारः। इन्द्रश्च स एवेति मन्वन्तरं पञ्चविधमेव। तच्च तृतीय
स्कन्धोपक्रमे निरूपितं। द्वितीयादिषु त्रिषु मन्वन्तरेषु मन्वादि षट्कमाह। स्वारोचिष इति द्वितीयः खि
लियावदिन्द्रमोक्षप्रश्नं॥ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्। द्युमत्सुषेणरोचिष्म

प्रमुखास्तस्य चात्मजाः ॥१९॥ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तंभादयः सप्त ऋ
षयो ब्रह्मवादिनः ॥२०॥ ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ॥ तस्यां जज्ञे ततो देवो विभुरित्य
भिविश्रुतः ॥२१॥ विभोरसौ धारणां चरितमाह । अष्टाशीतिसहस्राणीति ॥ब॥ अष्टाशीतिसहस्रा
णि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः ॥२२॥ तृतीय उत्तमो नाम प्रि
यव्रतसुतो मनुः ॥ पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप ॥२३॥ वसिष्ठतनयाः सप्त ऋषयः प्र
मदादयः ॥ सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित् ॥२४॥ धर्मस्य सूनृतायां तु भगवान्पुरुषो रा
त्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥२५॥ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ॥
भूतद्रुहो सानृतभूतगणानवधीत्सत्यजित्सखः ॥२६॥ सत्यजिदिंद्रस्तस्य सखा सन् ॥ब॥ चतुर्थ उत्तमभ्रा ४
ता मनुर्नाम्ना च तामसः ॥ पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥२७॥ उत्तमस्तृतीयो मनुस्त
स्य भ्राता ॥ब॥ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः सप्त ऋषयस्तामसेंतरे ॥२८॥

त्रिशिखः ईश्वर इंद्रः अन्यानपि विशिष्टपराक्रमान्देवानाह । देवा वैधृतय इति ॥ब॥ देवा वैधृतयो ना
म विधृतेस्तनया नृप ॥ नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥२९॥ तत्रापि जज्ञे भगवान्हरिण्यां
हरिमेधसः ॥ हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात् ॥३०॥ हरिरिति आहृतः व्याहृत ग्रहात्
ग्राहात् ॥ब॥ राजोवाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयं ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममू
मुचत् ॥३१॥ अमुमुचत् मोचयामास ॥ब॥ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभं ॥ यत्र यत्र
उत्तमश्लोको भगवान्गीयते हरिः ॥३२॥ श्रवणेच्छायां हेतुः । तत्कथासु तासु कथासु सा कथैव
वा महत्पुण्यं पुण्यविशेषणं धन्यमित्यादि ॥ब॥ सूत उ ॥ परीक्षितैवं स तु बादरायणिः प्रायोपवि
ष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वतां ॥३३॥ इति
श्रीभागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने प्रथमोऽध्यायः ॥ ॥ब॥ तुर्ये च मन्वंतरे प्रो
क्तं गजेंद्रस्य विमोक्षणं । द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥२॥ द्वितीये तु गजेंद्रस्य गजे

भिः क्रीडितो जले देवाग्राहहृष्टदीतस्य हरिस्मृतिरुदीर्यते ॥२॥ श्रीशुक उ० ॥ आसीद्गिरिवरो राजंस्त्रि
कूट इति विश्रुतः । क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः ॥ आसीत् अस्ति ॥१॥ तावता विस्
तः पर्यक् त्रिभिः शृंगैः पयोनिधिं । दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥२॥ तावता योज
नायुतेन । पर्यक् परितः । त्रिकूटसमाख्याबीजमाह । त्रिभिः शृंगैर्मुख्यैः ॥२॥ अन्यैश्च ककुभः
सर्वा रत्नधातुविचित्रितैः । नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसां ॥३॥ अन्यैश्च शृंगैर्निर्झराणा
णां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्त इति सर्वत्रैवान्वयः । कथंभूतैः शृंगै रत्नैर्धातुभिश्च वि
चित्रितैः नानाविधा द्रुमा लता गुल्मा येषु तैः ॥३॥ स चावनिज्यमानांघ्रिः समंतात्पय ऊर्मि
भिः । करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥४॥ पयसः ऊर्मिभिः समंतादवनिज्यमा
नांघ्रिर्यो मलप्रांतो यस्य हरिद्भिः पलाशवर्णैः ॥४॥ सिद्धचारणगंधर्वैर्विद्याधरमहोरगैः । किंन
रैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥५॥ यत्र संगीतसंनादैर्नदद्गुहममर्षया । अभिगर्जंति ह ५

रयः श्लाघिनः परशंकया ॥६॥ किंनरादीनां संगीतसंनादैर्नदंत्यो गुहा यस्मिन् प्रदेशे तं अभिगर्जं
ति हरयः सिंहाः अमर्षया असहनेन ॥६॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः । चित्रद्रुम
सुरोद्यानकलकंठविहंगमः ॥७॥ नानारण्याः पशवः तेषां व्राताः तैः संकुलाभिर्द्रोणीभिरलंकृ
तश्चासौ । चित्रा द्रुमा येषु तेषु सुरोद्यानेषु कलकंठा मधुरस्वरा विहंगमा यस्मिन् किंच ॥७॥
सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः । देवस्त्रीमज्जनामोदसौरभांबोनिलैर्यु
तः ॥८॥ स्वच्छोदकैः सरित्सरोभिर्युतः । मणय इव वालुका येषु तैः पुलिनैश्च युक्तः देव
स्त्रीणां मज्जनेन य आमोदस्तेन सौरभसुगंधं अंबु निश्चानिलास्तैः स युतश्चास्ते ॥८॥ तस्य
द्रोण्यां भगवतो वरुणस्य महात्मनः । उद्यानमृतुमन्नाम आक्रीडं सुरयोषितां ॥९॥ तस्य द्रो
ण्यां वरुणस्योद्यानमास्ते । गिरिवनादि सर्वं ध्येयमिति वक्ष्यति । अतो गिरिमुपवर्ण्य वनं व
र्णयति ॥ सर्वतोलंकृतमिति ॥९॥ सर्वतोलंकृतं दिव्यनित्यपुष्पफलद्रुमैः । पुनः गिरिवर्ण

यति मंदारै रितिचतुर्भिः॥ट॥ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः॥ इत्तैः श्रियालैः पन
सैराम्रैस्तथाम्रातकैरपि॥१०॥ मंदारादिभिर्वृत इत्यन्वयः॥ट॥ क्रमुकैर्नालिकेरैश्च खर्जूरै
र्बीजपूरकैः॥ मधुकैः शाललतालिश्च तमालैरर्जुनैः॥११॥ अरिष्टोडुंबरप्लक्षन्योवटैः किं
शुकचंदनैः॥ पिचुमंदकोविदारैः सरलैः सुरदारुभिः॥१२॥ द्राक्षेक्षुरंभाजंबूभिर्बदर्य
म्लातयामलैः॥ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः॥१३॥ तस्मिन्सरः सुविपुलं
लसत्कांचनपंकजं॥ कुमुदोत्पलकह्लारशतपत्रश्रियोज्झितं॥१४॥ तस्मिन्गिरौ सरः श्री
मत्तीत दर्शयति सुविपुलमित्यादिसार्द्धैः पंचभिः॥ लसंति कांचनपंकजानि यस्मिन्
कुमुदादिना श्रिया कुज्झितं॥ट॥ मत्तषट्पदनिर्घुष्टं शकुंतैः कलस्वनैः॥ हंसकारंड
वाकीर्णं चक्राह्वैः सारसैरपि॥१५॥ कलः स्वनो येषां तैः शकुंतैर्निर्घुष्टं चक्राह्वैः सारसै
रप्याकीर्णं॥ट॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितं॥ मत्स्यकच्छपसंचारचलत्प

६

द्मरजः पयः॥१६॥ जलकुक्कुटादीनां कुलैः कूजितं॥ मत्स्यादीनां संचारेण चलंतो पद्मानां रजः सा
युक्तं पयो यस्मिन् तत्॥ट॥ कदंबवेतसनलनीपवंजुलकैर्वृतं॥ कुंदैः कुरुबकाशोकैः शिरीषैः
कुटजेंगुदैः॥१७॥ कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः॥ मल्लिकाशतपत्रैश्च माधवीजाल
कादिभिः॥ शोभितं यत्तीरजैश्चान्यैर्नित्यर्तुभिरलंकृतं॥१८॥ नित्यं ऋतवः फलपुष्पादिसंपत्तिर्द
तावायः॥ षां तैरलंशोभितं॥ तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्॥
सकंटकं कीचकवेणुवेत्रविशालगुल्मं प्ररुजन्वनस्पतीन्॥१९॥ तत्रैव संति एकदा तद्गिरिका
ननाश्रयो वारणयूथपः करेणुभिश्चरन् हृष्टः षाड्भिन्नस्वस्थेन हृतः सारावरस्यान्त्यासंसमीपमगम
दिति पंचमेनान्वयः॥ किं कुर्वन् कीचकवेणुवेत्रवंतं विशालं गुल्मं लतादिसंदर्भं वनस्पतींश्च प्र
रुजन् प्रभंजन्॥ट॥ यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः॥ महोरगाश्चापि
भयाद्द्रवंति सगौरकृष्णाः सरभाश्चमर्यः॥२०॥ कृष्यंत्ततः यस्य गंधमात्राद्धरयः सिंहाः गजेंद्रा
दयाश्च भयाद्द्रवंति॥ पलायंते॥ट॥ वृकाः वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च

व

जलपानार्थं तत्र मृगाः शशादयश्चरंति लीलायदनुग्रहेण ॥२१॥ वृकादयस्तु गजाश्च सप्राणिनो ऽन्यत्र न
दृष्टिपथं त्यक्त्वा चरंति ॥ ७ ॥ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ॥ गिरिंगि
रिम्णा परितः प्रकंपयन्निषेव्यमाणो ऽलिकुलैर्मदाशनैः ॥२२॥ पुनः कीदृशः ॥ घर्मतप्तः ॥ मद
मदश्रावी मदस्रं नितिनध्याने ॥ ७ ॥ सरो ऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ॥ वृतः
स्वयूथेन तृषार्दितेन सरोवराभ्यासमथागमद्द्रुतं ॥२३॥ विगाह्य तस्मिन्नमृताम्बु निर्मलं हेमारविंदो
त्पलरेणुवासितं। पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः ॥२४॥ निजेन पुष्क
रेण करोग्रेणोद्धृतं गतक्लमः सन् निकामं पपौ ॥ ७ ॥ स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्न
पयंस्तथा गृही। घृणी करेणुः करभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणो ऽजमायया ॥२५॥ तं तत्र कश्चि १
न्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत् ॥ यदृच्छयैवं व्यसनं गतो गजो यथाबलं सो ऽतिब
लो विचक्रमे ॥२६॥ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा। विचुक्रुशुर्दीनधियो

पारे गजाः पार्ष्णिग्रहास्तारयितुं न चाकरोत् ॥२७॥ दीनधीयः करेणवः केवलं विचुक्रुशुः ॥ ७ ॥ नियुध्यतो
रेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंस
तामराः ॥२८॥ ततो गजेंद्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेऽव
सीदतो विपर्ययो ऽभूत्सकलं जलौकसः ॥२९॥ मनउत्साहशक्तिः ॥ बलं शारीरं ॥ ओजः इंद्रियं ॥ तेषां स
कलं बलादि विपरीतं अधिकं जलौकसो ग्राहस्य ॥ ७ ॥ इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही वि
वशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥३०॥ स इत्थं यदा प्रा
णसंकटमापन्नो देही बुद्धिमेवाह नमामीति ॥ ७ ॥ न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः
प्रभवंति मोचितुं ग्राहेण पाशेन विधातुरावृतो ऽप्यहं च तं यामि परापरायणं ॥३१॥ अहं च ततन प्रन
मामि। यतः ग्राहरूपेण केवलं विधातुः पाशेनावृतः ॥ तथापि तं परं परमेश्वरं परेषां ब्रह्मादीनां अपि

नमाः अयन्तं शरणं यामि। कोसौ यं शरणं यासि तत्राह। यः कश्चनेति॥छ॥ यः कश्चनेशो बलिनोंतको
रगात्प्रचंडवेगादभिधावतो भृशं॥ भीतं प्रपन्नं परिपाति यद्भयात्। मृत्युः प्रधावत्यरणं तमीमहि॥३३॥
अंतक एवोरगस्तस्मात्। तं शरणं ईमहि व्रजेम। यद्भयादित्यत्र श्रुतिः। भीषास्माद्वातः पवते भीषे
तोदेति सूर्यः। भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति॥छ॥ इति श्रीभागवते महापुराणे अष्ट
मस्कंधे गजेंद्रमोक्षणे द्वितीयोध्यायः॥ ॥छ॥ ॥तृतीये तु गजेंद्रेण स्तुतो हरिरुपोत्यतं। समुद्धृ
रत ग्राहाद्ग्राहं देवलशापतः॥१॥ श्रीशुक उ०॥ एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि। जजाप परमं
जाप्यं प्राग्जन्मन्यनुशिक्षितं॥१॥ जाप्यं जप्यं स्तोत्रं। प्राग्जन्मनि इंद्रद्युम्नसंज्ञे॥छ॥ गजेंद्र उ०। ॐ नमो ८
भगवते तस्मै यत एतच्चिदात्मकं॥ पुरुषायादिबीजाय परेशायाभिधीमहि॥२॥ तस्मै नमो नमनं
भिधीमहि। अभिधायेम केवलं। माद्दृग्दृष्टिं तु चेन कायप्रणतेरशक्यत्वात्। स्वास्य तत्तत्त्वानं संभाव

पितुं चिरान्नष्टा। यत्तच्चिद्रूपत्वात्। एतद्देहादि चिदात्मकं चेतनं भवति तदुक्तं। येन चेतयते वि
श्वमिति। तत्र हेतुः। पुरुषाय पुर्युकारणत्वेन प्रविष्टाय। ननु प्रकृतिपुरुषौ कारणमिति। प्रसि
द्धिः तत्राह। आदिः प्रकृतिः बीजं पुरुषः। तद्रूपाय। प्रविष्टत्वेपि जीववत्पारतंत्र्यं वारयति। प
रमेश्वर्यं विहितं एवत्राह। यावत्समाधिः॥छ॥ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं। योस्मात्परा
च परमं तं प्रपद्ये स्वयंभुवं॥३॥ यस्मिन्नधिष्ठाने। यतः उपादानात्। येन कर्त्रा यः स्वयमेवेदं
विश्वं भवति। अस्मात्कार्यात्परात्कारणाच्च। यः परः तं स्वयंभुवं स्वतः सिद्धं प्रपद्ये। शरणं व्रजामि॥
विश्वहेतुत्वस्य नः सिद्धत्वं चोक्तं। इदानीं विश्वप्रकाशत्वं स्वप्रकाशत्वं च वर्णयन्नार्थयते॥३॥
यः स्वात्मनीदं निजमाययार्पितं। क्वचिद्विभातं क्व च तत्तिरोहितं। अविद्धदृक्साक्ष्युभयं त
दीक्षते स आत्ममूलोवतु मां परात्परः॥४॥ विभातं अभिव्यक्तं सत् क्वचित्प्रलये तिरोहितं। अवि

द्दृक्साक्ष्युभयंतदीक्षतेसआत्ममूलोवतुमांपरात्परः॥४॥विचानेअर्पितंव्यक्तंसत्क्वचिल्लये
तिरोहितंलीनंसत्तदुभयंकार्यकारणंचासाक्षीसन्नीक्षते॥साक्षित्वेहेतुः।अविद्धदृक्अलिप्त
दृष्टिः।आत्ममूलःस्वप्रकाशःअतःपरात्प्रकाशकाच्चक्षुरादेरपिपरः।तस्यापिप्रकाशकइत्य
र्थः।चक्षुषश्चक्षुरित्यादिश्रुतेः॥तिरोहितमीक्षितइत्युक्तंतत्प्रपंचयन्सर्वकर्तृत्वंचवदन्प्रार्थयते॥
कालेनेतिद्वाभ्यां॥५॥कालेनपंचत्वमितेषुकृत्स्नशोलोकेषुपालेषुचसर्वहेतुषु॥तमस्तदासी
द्गहनंगभीरंयस्तस्यपारेभिविराजतेविभुः।पंचत्वमितेषुनाशंप्राप्तेषु।गंभीरमनंतंतस्यतम
सः।आदित्यवर्णंतमसःपरस्तादितिश्रुतेः॥५॥नयस्यदेवाऋषयःपदंविदुर्जंतुःपुनःकोर्ह ८५
तिगंतुमीरितुं।यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमावतु॥६॥अतएवादेवा
दयोयस्यस्वरूपंनविदुर्जंतुरर्वाचीनः।गंतुंज्ञातुं।ईरितुंवक्तुंवा।दुरत्ययंदुर्गमंअनुक्रमणंचरि

तंकथनंवायस्यसमामां।कथंतर्हि।तमेवविदित्वातिमृत्युमेतिइत्यादिश्रुतिरित्याशंक्यनतज्ज्ञानोपा
यंकथयन्नाह।दिदृक्षवइति॥७॥दिदृक्षवोयस्यपदंसुमंगलंविमुक्तसंगामुनयःसुसाधवः।चरंत्यलो
कव्रतमव्रणंवनेसर्वात्मभूताःसुहृदःसमेगतिः॥७॥अलोकव्रतंब्रह्मचर्यादि।अव्रणं।अखंडं।स्वग
तामात्मानंताःभूतेष्वप्यात्मदृष्टयः।सनःसाहरिःगतिरस्तु।दुरत्ययानुक्रमणंतच्चप्रपंचय
न्नाहमतिं।नविद्यतइत्यादि।नविद्यतेयस्यचजन्मकर्मवाननामरूपेगुणदोषएववा।तथापिलोका
प्ययसंभवाययःस्वमायया।तान्यनुकालमृच्छति॥८॥लोकानामप्ययःप्रलयः।संभवोजन्मतयोर्द्वंद्वै
क्यं।तदर्थंयस्तानिजन्मादीनिस्वीकरोति।तस्मैनमइत्युत्तरेणान्वयः॥८॥तस्मैनमःपरेशायब्रह्मणे
ऽनंतशक्तये।अरूपायोरुरूपायनमआश्चर्यकर्मणे॥९॥ब्रह्मणोऽनंतशक्तये॥ततआश्चर्याणिकर्मा
णियस्यतस्मैपरेशायनमः॥९॥नमआत्मप्रदीपायसाक्षिणेपरमात्मने।नमोगिरांविदूरायमनसश्चेतसा

मपि॥१०॥ आत्मप्रदीपाय प्रकाशानन्यस्याविषयाय। ऊनः साक्षिणे प्रकाशकाय परमात्मने जीवनियंत्रे॥
अत एव गिरां विदूराय अप्राप्याय चेतसां चित्तवृत्तीनां। तथा च श्रुतिः॥ यतो वाचो निवर्तंते अप्राप्य म
नसा सहेति॥ छ॥ सत्त्वेन प्रतिलभ्याय नैःकर्म्येण विपश्चिता। नमः कैवल्यनाथाय निर्वाणसुखसंवि
दे॥ ११॥ विपश्चिता निपुणेन नैःकर्म्येण संन्यासेन। सत्त्वेन शुद्धेन संन्यासयोगाद्यतयः शुद्धसत्त्वा इ
ति श्रुतेः। प्रतिलभ्याय प्रत्यक्त्वेन प्राप्याय निर्वाणसुखं संविदे मोक्षानंदानुभूतये॥ छ॥ नमः शां
ताय घोराय मूढाय गुणधर्मिणे। निर्विशेषाय साम्याय नमो ज्ञानघनाय च॥ १२॥ गुणधर्मिणे सत्त्वा
दिधर्मानुकारिणे। ज्ञानघनाय चेति निर्विशेषत्वेपि प्रधानवैलक्षण्यमुक्तं॥ छ॥ क्षेत्रज्ञाय नमस्तुभ्यं १०
सर्वाध्यक्षाय साक्षिणे। पुरुषायात्ममूलाय मूलप्रकृतये नमः॥ १३॥ साक्षिणे इति सर्वाध्यक्षस्य चेतपि
निर्विकारत्वमुक्तं। आत्मनां क्षेत्रज्ञानां मूलाय। मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतुनवोनत्र हेतुः।

पुरुषाय सर्वमिव सते। तथा च श्रुतिः। सर्वमेवाहमिहास्मि। तत्पुरुषस्य पुरुषश्चेदिति मूलायेति
वा॥ छ॥ सर्वेंद्रियगुणद्रष्टे सर्वप्रत्ययहेतवे। असताच्छाययोक्ताय सदाभासाय ते नमः॥ १४॥ सर्वेंद्रि
याणां ये गुणा विषयास्तेषां द्रष्टे सर्वप्रत्यया इंद्रियवृत्तयस्तासां हेतवे ज्ञापकं यस्य तस्मै। तदेवाह। असता अ
हंकारादिप्रपंचेन छायया सरूपया उक्ताय प्रतिबिंबेन बिंबमिव सूचिताय। तत्र हेतुः। सद्रूपो विष
यथाभासो यस्य तस्मै। तदुक्तं तृतीये। यथा जलस्थ आभास इत्यादिना। पाठांतरे। असत्यस्तस्य छा
यया अध्यासेनोक्ताय तदधिष्ठानायेत्यर्थः॥ छ॥ नमो नमस्तेऽखिलकारणाय निःकारणायाद्भु
तकारणाय। सर्वागमाम्नायमहार्णवाय नमोपवर्गाय परायणाय॥ १५॥ अखिलकारणाय सर्वका
रणकरूपाय अत एव स्वयं निःकारणाय। कारणे चेपि मृदादिवद्विकारवारयति॥ अद्भुतकारणाये
ति। एवं तर्हि चेपि प्रमाणमाह। सर्वे आगमाः पंचरात्रादयः। आम्नायाश्च वेदाः। तेषां महार्णवाय। श्रो

तस्मिन्निव विपर्यवसानस्थानाय। अपवर्गाय मोक्षरूपाय। अनन्तपरायणाय॥१४॥

गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय। नैःकर्म्यभावेन विवर्जितागमस्वयंप्रका-
शाय नमस्करोमि। गुणा एवारणयस्तया छन्नश्चिदूष्मपयः ज्ञानाग्निः तस्मै। तेषां गुणानां क्षोभे
विस्फूर्जितं बहिर्वृत्तिकं मानसं यस्य। योऽकामयत। बहु स्यामिति श्रुतेः। नैःकर्म्यमात्मतत्त्वं। तस्य
भावेन भावनया विवर्जिता आगमा विधिनिषेधलक्षणा येभ्यस्तेषु स्वयमेव प्रकाशो यस्य तस्मै॥१५॥
मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय स्वांशेन सर्वतनुभृन्म-
नसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते॥ मादृक् मद्विधस्य यः प्रपन्नः पशुः तस्य पाशो- ११
विद्या तस्य विशेषेण मोक्षणं येन तत्र योपतामाह। मुक्ताय मोचनहेतुः। भूरिः करुणा यस्य। त-
त्रापि अलसाय॥ अनलसाय। स्वांशेन अन्तर्यामिरूपेण सर्वेषां तनुभृतां मनसि प्रतीता प्रत्यग्ज्ञा-

-त्रत्वक तस्मै। तथा च श्रुतिः। आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति। भगवते सर्वेषां तनुभृतां
नियमने समर्थाय। तेषां मनसि स्थितश्चेदपि बृहते अपरिच्छिन्नाय॥१६॥ आत्मात्मजाप्तगृहवित्त-
जनेषु सक्तैर्दुःप्रापणाय गुणसंगविवर्जिताय। मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने
भगवते नम ईश्वराय॥१७॥ अन्तःस्थश्चेदपि देहादिष्वासक्तैर्दुःप्रापणाय। प्राप्तुमशक्याय। तत्र हे-
तुः। गुणसंगेन विवर्जिताय। अत एव मुक्तात्मभिर्देहादिष्वनासक्तैश्चिन्तिताय। ततो परिभावित-
स्वरूपमाह। ज्ञानात्मने इत्यादि॥१७॥ यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति।
किं चाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणं। इष्टां गतिं काम्यितं धर्मादिचतु-
र्वर्गमेव। न तु तावदेव। किं तु यस्तेऽकामिता॥ अन्या आशिषो राति देहमव्ययं राति। एवं प्र-
भुरदभ्रदयः समे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थये॥१८॥ एकान्तिनो यस्य न किंच-

नार्थं वांछंति ये वै भगवत्प्रपन्नाः॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः॥२०॥ ए
तावदप्यहं न किंतु सुखानभिज्ञ चेन वांछामि। यस्य चैकांतभक्ताः न किंचिदर्थं वांछंति। तं परब्रह्मी
डे स्तोमी स्तुतरेणा च यः। तेषां निःकाम चेदेहुः। ये वै भगवतः सर्वज्ञानमुक्तात् प्रपन्नाः से वित
वंतः॥८॥ नमक्षरं ब्रह्मपरं परेशमव्यक्तमाध्यात्मिकयोगगम्यं। अतींद्रियं सूक्ष्ममनीव दूरमनं
तमाद्यं परिपूर्णमीडे॥२१॥ अत्यद्भुतं सुमंगलं चेप्रदर्शनार्थमक्षरत्वादिविशेषणानि। परिपूर्ण
चंदर्शयिन्नाह त्रिभिः॥८॥ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः। नामरूपविभेदेन फल्ग्व्या
स्वकलया कृताः॥२२॥ यस्य फल्ग्व्या स्वस्यैव कलया अंशेन कृताः। सृज्यता दिति तृतीयेनाव
यः॥८॥ यथार्चिषोग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरोचिषः। तथा यतोयं गुणसंप्रवाहो
बुद्धिर्मनः खानि शरीरसर्गाः॥२३॥ कथं कृता इत्यपेक्षायां दृष्टांतौ यथार्चिषोग्नेरिति प्रवाहे दृष्टांत सवितु १२

र्गभस्तय इत्यानंत्या। निर्यांति उत्पद्यंते। संयांति लीयंते। गुणसंप्रवाहमेवाह॥ बुद्धिर्मनश्च खानि निति
कारणानि शरीरसर्गः कायदेहप्रवाहो मस्य यतो भवति सः॥८॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री
न षंढो न पुमान् न जंतुः। नायं गुणः कर्म न सन्न चासन् निषेधशेषो जयतादशेषः॥२४॥ अत एव देवा
दीनां मध्ये कोपि न भवति। न जंतुः लिंगत्रयरहितं प्राणिमात्रमपि न। किंतु सर्वस्य निषेधेन शिष्यतं इ
ति निषेधशेषः। मायया अशेषात्मकश्च जयतात्म। द्विमोक्षणाय आविर्भवतु॥८॥ जिजीविषे नाहमि
हामुया किमंतर्बहिश्चावृतयेभयोन्या। इच्छामि कालेन न कस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षं
॥२५॥ नव प्राह। शरीरस्य मोक्षणे नाहं जिजीविषमिच्छामि॥ तत्र हेतुः। अमुया [illegible] हि श्राविवेकव्या
सया गजजात्या किं प्रयोजनं। आत्मलोकस्य आत्मप्रकाशस्य। य[illegible]वर॥ [illegible] तस्यैव तु मोक्षमि
छामि। यस्य मोक्षस्य कालेन नाशो नास्ति। पश्चाद्देहस्य बंधो देहना[illegible] किंतु मोक्षमार्थ्यं ने

ना॥ आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति तानेक निवर्त्त्यं चांत॥ अतस्तस्यैव मोक्षमिच्छामी
त्यर्थः॥ठ॥ सोहं विश्वसृजं विश्वमविश्वं विश्ववेदसं। विश्वात्मानमजं ब्रह्म प्रणतोस्मि परं पदं॥२६॥
सोहं मुमुक्षुः। विश्वं विश्वरूपं॥ वस्तुतो ऽविश्वं विश्वव्यतिरिक्तं चापि वेदा येन तत्प्रकरणं यस्य
तं। विश्वस्यात्मानं च। केवलं प्रणतोस्मि। तत्तु तं जानामि योगं विना द्रष्टुं निचादित्याह॥ठ॥ योगरंधि
तकर्माणो हृदि योगविभाविते। योगिनो यं प्रपश्यंति योगेशं तं नतोस्म्यहं॥२७॥ योगेन भगवद्धर्मे
णरंधितानि दग्धानि कर्माणि येषां प्रपश्यंति। योगेशं तं नतोस्म्यहं। नदि सर्वपि योगमेवाकिंना
स्तिनास्तत्राह। नम इति द्वाभ्यां॥ठ॥ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय प्र १३
पन्नपालाय दुरंतशक्तये। कदिंद्रियाणामनवाप्यवर्त्मने॥२८॥ असह्यो वेगो रागादिलक्षणो
यस्य तथाभूतं शक्तित्रयं यस्य तस्मै॥ बहिश्चाखिलधियां सर्वेंद्रियाणां गुणाय शब्दादिरूपे

णप्रतीयमानाय। अतः कदिंद्रियाणां कुत्सितानींद्रियाणि येषां तेषामनवाप्यं वर्त्म यस्य॥ठ॥ नायं वेद
स्वमात्मानं यच्छक्त्याहंधिया हतं। तं दुरत्ययमाहात्म्यं भगवंतमितोस्म्यहं॥२९॥ यच्छक्त्या यस्य
मायया अहंधीस्तया हतं आच्छन्नं अयं जनो न वेद। दुरत्ययं माहात्म्यं यस्य तं। इतः आश्रितोस्मि॥
ठ॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः। नैते यदोपससृपु
र्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत्॥३०॥ उपवर्णितनिर्विशेषं मूर्त्तिभेदं वि
ना परं तत्त्वं येन तं। विविधो वासौ लिंगभिदो मूर्त्तिभेदः तस्याभिमानो येषां। अतः एते यदा नोप
जग्मुः। तत्र तदा अखिलामरमयः सार्वादेवमयमूर्त्तिः॥ठ॥ तं तद्वदार्त्तमुपलभ्य जगन्निवासः
स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः। छंदोमयेन गरुडेन समुह्यमानश्चक्रायुधोभ्यगमदाशु
यतो गजेंद्रः॥३१॥ दिविजैर्देवैः। छंदोमयेनेति त्रियोघ्यापास्कं॥ठ॥ सोंतःसरस्युरुबलेन गृ

हात आर्त्तिं दृष्ट्वा ग्राहग्रस्तमतिं हरिः खगपाणिचक्रे। उत्क्षिप्य तं भुजकरं गिरमाह कृच्छ्रान्नारायणाखि
लगुरो भगवन्नमस्ते॥ ३२॥ खे दृष्ट्वा उपात्तं उद्यतं चक्रं येन॥ ७॥ संसारसागरे मग्नं दीनं मां करुणानिधे।
कामग्राहगृहीतं मां पाहि विष्णो नमोऽस्तु ते। तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः
कृपयोज्जहार। ग्राहाद्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुच्छ्रियाणां॥ ३३॥
गजेंद्रोपि मंदगतिरिति ततः सहसावतीर्य॥ अरिणा चक्रेण विपाटितं यस्य। उच्छ्रियानां देवानां॥
७॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे गजेंद्रमोक्षणे तृतीयोध्यायः॥ ७॥ ॥ चतुर्थे तु त
योर्ग्राहः शापगंधर्वतां पुनः। गजं स्वपार्षदं चक्रे चाद्धरिर्निन्ये निजं पदं॥ श्रीशुक उ०॥ तदा देवर्षिगं
धर्वब्रह्मेशानपुरोगमाः॥ मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः॥ नेदुर्दुंदुभयो दिव्या गंधर्वा १४
ननृतुर्जगुः। ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं॥ २॥ योसौ ग्राहः स वै सद्यः परमाश्चर्यरू

पधृक्। मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः॥ ३॥ प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं। अगायत
यशोधाम कीर्त्तन्यगुणसत्कथं॥ ४॥ हूहूः सत्तो यो गंधर्वसत्तमः। असौ देवलस्य शापेन ग्राहो जा
तः स वै तेन ततः। सद्यो मुक्तः सन् उत्तमश्लोकमगायत तस्य च यः। एवं हीति ह्ययोत्तमे कथा। यस्यापि की
कोऽप्यसौ स्नातुं प्रविष्टं देवलं पादेन गृहीत्वा विचकर्ष। स च प्रकुपितो ग्राहो भवेति शशाप। तेन च प्रसा
दितः। स तु वाच। एवमेव गजेंद्रं गृह्णीष्व तत्र गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति। कथंभू
तं यशोधाम आश्रमयं। अतः कीर्त्तन्याः कीर्त्तनीयाः गुणाः सती कथा च यस्य तं॥ ७॥ सोऽनुकंपित
ईशेन परिक्रम्य प्रणम्य तं। लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः॥ स्वं गंधर्वलोकं॥ ५॥
गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात्। प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः॥ ६॥ स वै पू
र्वमभूद्राजा पांड्यो द्रविडसत्तमः। इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः॥ ७॥ स एकदाराधनका

न्नात्मवान्गृहीतमौनव्रतईश्वरंहरिं॥जटाधरस्तापसआप्लुतोऽच्युतंसमर्चयामासकुलाचलाश्र
मः॥८॥कुलाचलेमलयाद्रावाश्रमोयस्य॥७॥यदृच्छयातत्रमहायशामुनिःसमागमच्छिष्यगणैःप
रिश्रितः।तंवीक्ष्यतूष्णीमकृतार्हणादिकंरहस्युपासीनमृषिश्चुकोपह॥९॥रहसिरहस्युपासीनंवी
क्षा॥७॥तस्मा इमंशापमदादसाधुरयंदुरात्माकृतबुद्धिरद्यविप्रावमंताविशतांतमिस्रंयथा
गजःस्तब्धमतिःसएव॥१०॥शापमेवाह।असाधुरित्यादि॥अकृताअशिक्षिताबुद्धिर्यस्यगजोयथा
स्तब्धमतिस्तथैवायं।अतःसएवगजएवभवत्वितिशेषः।७॥श्रीशुकउ॥एवंशप्त्वागतोऽगस्त्योभगवा
न्सहानुगः।इंद्रद्युम्नोऽपिराजर्षिर्दिष्टंतदुपधारयन्॥११॥आपन्नःकौंजरींयोनिमात्मस्मृतिविनाशिनीं॥
हर्यर्चनानुभावेनयद्गजत्वेऽप्यनुस्मृतिः॥१२॥दिष्टंदैवप्रापितंतदुपधारयन्नालोचयन्कौंजरींयोनिमाप १५
न्नः।तर्हिपश्चात्कथंस्मृतिरुक्ता।तत्राह।हरेरर्चनस्यानुभावेनेति॥७॥एवंविमोक्ष्यगजयूथपमब्जं

नाभस्तेनापिपार्षदगतिंगमितेनयुक्तः।गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतंस्वभवनं
गरुडासनोऽगात्॥१३॥अद्भुतंस्वभवनमगात्॥७॥एतन्महाराजतवेरितोमयाकृष्णानुभावोगजरा
जमोक्षणं।स्वर्ग्यंयशस्यंकलिकल्मषापहंदुःस्वप्ननाशंकुरुवर्यशृण्वतां॥१४॥एतद्गजराजमोक्ष
णोनामकृष्णानुभावस्तवेरितः।कथंभूतंस्वर्ग्यमित्यादिदुःस्वप्ननाशयतीतितथा॥७॥यथानुकी
र्तयंत्येतच्छ्रेयस्कामाद्विजातयः।शुचयःप्रातरुत्थायदुःस्वप्नाद्युपशांतये॥१५॥अतःश्रेयस्कामाः
एतद्यथावदनुकीर्तयंतिअनेनश्रेयोभगवतिरतिरितिकृतोऽयंसाक्षात्कृष्णवाग्वचनादेवेत्याह।इ २१
दमाहेत्यादियावत्समाप्तिः॥७॥इदमाहहरिःप्रीतोगजेन्द्रंकुरुसत्तम।शृण्वतांसर्वभूतानांसर्वभूत
मयोविभुः॥१६॥येमांत्वांचसरश्चेदंगिरिकंदरकाननं।वेत्रकीचकवेणूनांगुल्मानिसुरपादपान्॥
१७॥प्रसंगादन्यस्यापिश्रवणफलमुच्यते।सर्वेषांद्वितीयांतानांस्मरंतीत्यष्टमेनान्वयः॥७॥शृंगा

नीमानि धिस्न्यानि ब्रह्मणो मे शिवस्य च। क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्करं॥१८॥ श्रीवत्सं कौस्तु
भं मालां गदां कौमोदकीं मम। सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं॥१९॥ शेषं च मत्कलां सूक्ष्मां श्रियं दे
वीं मदाश्रियां। ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च॥२०॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे। क
र्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनं॥२१॥ प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययं॥ दाक्षाय
नीः धर्मपत्नीः सोमकश्यपयोरपि॥२२॥ अव्यक्तं मायां। अव्ययं धर्मं त्रिक्रियस्थलां। सोमकश्यपयो
रपि पात्रीर्दाक्षायणी॥ठ॥ गंगां सरस्वतीं नंदां कालिंदीं सितवारणं। ध्रुवं ब्रह्मऋषीन्सप्त पुण्यश्लो
कांश्च मानवान्॥२३॥ सितवारणमैरावतं॥ठ॥ उत्थायापररात्रांते प्रयताः सुसमाहिताः। स्मरंति म २६
मरूपाणि मुंचते ह्येनसोऽखिलात्॥२४॥ सुसमाहिताः एकाग्रचित्ताः। ममरूपाणि मद्विग्रहाः॥ठ॥
ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये। तेषां प्राणात्यये चाहं ददामि विमलां मतिं॥२५॥ श्रीशुक उ

इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमं। हर्षयन्विबुधानीकमारुरोह खगाधिपं॥२६॥ जलजोत्त
मं शंखवरं प्रध्माय वादयित्वा॥ठ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे गजेंद्रमोक्षणं नाम च
तुर्थोऽध्यायः॥४॥ अमृताख्यानमष्टौ तिरस्कापि रस्तुवर्ण्यते। स्वनक्षपदपातेन यत्र योषापि तंदरः॥
१॥ पंचमे पंचमं वाथ षष्ठं च कथ्यते मनुं। विप्रशापाच्च निःश्रीकैः स्तोत्रं देवैर्हरेस्तुतिं॥२॥ श्रीशुक उ॥
राजन्नुदितमेतत्ते कर्माघनाशनं हरेः। गजेंद्रमोक्षणं पुण्यं रैवतं चांतरं शृणु॥१॥ पंचमो रैवतो ना
म मनुस्तामससोदरः। बलिविंध्यादयस्तस्य सुता ह्यर्जुनपूर्वकाः॥२॥ तामसश्चतुर्थो मनुस्तस्य सोद
रः भ्राता॥ठ॥ विभुरिंद्रः सुरगणा राजन्भूतरयादयः। हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः॥३॥
पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः। तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं॥४॥ वैकुंठः
कल्पितो येन लोको लोकनमस्कृतः। रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया। तस्यानुभावः कथितु

णाश्च परमोदयानोः॥ नोमात्रेऽस्सविममेयो विष्णोर्वीर्यगुणान्॥६॥ तस्यैवेकुंठमंडलस्य हरेरनुभावः॥
सनकादिशापेन दैत्यतां प्राप्तान्यां स्वपार्षदान्यां वाराहादिरूपेण गुह्यादिलक्षणाः॥ गुणाश्च ब्रह्मण्यताद
यः परमोदयाश्च महर्षयः॥ कथितानि तृतीयादिषु॥७॥ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः पुरु
षपुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः॥७॥ इन्द्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गुणाः॥ मुनयस्तत्र वै
राजन् हविष्मद्वीरकादयः॥८॥ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः॥ अजितो नाम भगवानंशेन जग
तीपतिः॥९॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा भ्रममाणोंऽभसि धृतः॥ कूर्मरूपेण मंदरः॥१०॥ सु
राणां सौधिता सुधेत्यस्य काचाथ्यपि सूचिता॥ अतः पृच्छति॥११॥ राजोवाच॥ यथा भगवता ब्रह्मन्मथितः
क्षीरसागरः॥ यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना॥१२॥ पततो हेतोः अंबुचरात्मना कूर्मरूपेण॥११॥ १२
यथामृतं सुरैः प्राप्तं किंमन्यदभवत्ततः॥ एतद्भगवतः कर्म वदस्व परमाद्भुतं॥१२॥ त्वया संकथ्यमा

नेन महिम्ना सात्वतां पते॥ नातितृप्यति मे चित्तं सुचिरं तापतापितं॥१३॥ संपृष्टो भगवानेवं द्वैपायनसु
तो द्विजाः॥ अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे॥१४॥ श्रीशुक उ॥ यदा युद्धेऽसुरैर्देवा बाध्यमानाः शि
तायुधैः॥ गताः सर्वे निपतिता नोत्तिष्ठेरन् स्म भूयसः॥१५॥ नोत्तिष्ठेरन् न पुनर्जीवंति स्म त्यर्थः॥१६॥ य
दा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप॥ निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः॥१६॥ दुर्वा
सा हि कदाचिन्मार्गे गच्छन्नपि इंद्रं दृष्ट्वा स्वकंठस्थां मालां तस्मै ददौ॥ तेन च श्रीमदेनाहृत्यैरावतस्य
कुंभयो निक्षिप्तास च मत्तः पद्भ्यां तां मालां हतां वर्यांचकार॥ ततः कुपितो दुर्वासास्तेन शापत्रि निर्लो
के सद्यः निःश्रीको भवेति॥ तदेतदाह॥ यदा दुर्वाससः शापादिति॥ इज्यादयः यागादयः॥१७॥ निशाम्यै
तत्सुरगणा महेंद्रवरुणादयः॥ नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिर्णयं॥१७॥ ततो ब्रह्मसभां जग्मु
र्मेरोर्मूर्द्धनि सर्वशः॥ सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने॥८॥ स विलोक्येंद्रवाय्वादीन्निःसत्वान्

विगतप्रपात्।लोकाननमंगलआयानयथाप्रभुः॥२६॥समाहितेनमनसासंस्मरंपुरुषंपरं।उवाचो
त्फुल्लवदनोदेवान्सभगवान्परः॥२७॥असुरान्अपथादेवबैलक्षणयेनबलपुष्ट्यादिपुष्पाश्चितो
केत्यर्थः।इतिशरणंगनाःसंतोयथाहर्वंसर्वंप्राप्स्यामइति।हर्षेणोत्फुल्लंविकसितंवदनंयस्य॥२८॥
ब्रह्मोवाच॥अहंभवोयूयमथोसुरादयोमनुष्यतिर्यक्द्रुमघर्मजातयः।यस्यावतारांशकलावि
सर्जिताव्रजामसर्वेशरणंतमव्ययं॥२९॥मनुष्यादयोजरायुजांडजोद्भिज्जस्वेदजाः।यस्यावता
रःपुरुषःअंशोब्रह्मातस्यकलामरीच्यादयः।ताभिर्विसर्जिताःपुत्रपौत्रद्वाराजनिताः।ननुत
र्हिसर्वेषसोममःस्यात्।किंतच्छरणाश्रयेण।सत्यंयद्यप्येवंतथाप्यस्मत्पक्षेनातीनविष्यतीत्या १८
येनाह।नयस्येतिद्वाभ्यां॥३०॥नयस्यवध्योनचरक्षणीयोनोपेक्षणीयादरणीयपक्षः।अथापिसर्ग
स्थितिसंयमार्थंधत्तेरजःसत्वतमांसिकाले॥३१॥अयंचतस्यस्थितिपालनक्षणःसत्वंजुषा

णस्यभवायदेहिनां।तस्माद्व्रजामःशरणंजगद्गुरुंस्वानांसनोधास्यतिशंसुरप्रियः॥३२॥स्थिति
पालनस्यक्षणःकालः।अतःसुरप्रियःसन्स्वीयानांनःशंसुखंकरिष्यति॥३३॥श्रीशुकउ॥इत्याभा
ष्यसुरान्वेधाःसहदेवैररिंदम।अजितस्यपदंसाक्षाज्जगामतमसःपरं॥३४॥यत्रक्षीराब्धौइहरवा
सः।तदेवसेतमसःपरंस्थानं।यद्वा।लोकालोकात्परतोयत्तमःततःपरंस्थानंजगाम॥३५॥त
त्रादृष्टस्वरूपायश्रुतपूर्वायवैप्रभोः।स्तुतिमब्रूतदैवीभिर्गीर्भिस्त्ववहितेंद्रियः॥३६॥दिवीनिर्दे
केश्चप्रमित्वान्निर्वेदिकीभिर्गीर्भिःस्तुतिमकरोत्॥ब्रह्मोवाच॥अविक्रियंसत्यमनंतमाद्यंगुहाशयं
निष्कलमप्रतर्क्यंमनोग्रयाणंवचसानिरुक्तंनमामहेदेववरंवरेण्यं॥३७॥देववरंनमामहेनमा
मदेववरंचांनमामेतिवा॥कूटस्थेदेहः।अविक्रियंनकृतः।अनंतंचाद्यंचअनादि।आद्यंतवंतो
हिघटादिविक्रियावंतोनचैवंतिकिंचागुहाशयंसर्वंवंतिरंकुनःनिःकलोनिरूपाधित्कृतो॥मनो

प्रयाणं मनसोपि जविष्ठं। मनः प्राप्येत्स्थानेन नः प्रागेव विद्यमानत्वात्। तथा च श्रुतिः। अनेजदेकं मन
सो जविष्ठो नैनद्देवा आप्नुवन्पूर्वमर्षत्। तद्धावतोन्यानत्येति तिष्ठदिति॥ वचसां अनिरुक्तं। अवि
षयत्वात्। यद्वाचानभ्युदितं येन वागभ्युद्यत इति श्रुतेः। मनोवचसोरगोचरत्वादप्रतर्क्यं यथे
ष्टं वा सर्वेषां हेतुहेतुमद्भावः। किंच॥ विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाणां समनिंक्रमत्र
णां॥ छायातपौ पश्यन्तरं ध्रुवपदीतमहारभ्यवो त्रियुगं व्रजामहे॥ २७॥ प्राणादीनां विपश्चितं ज्ञा
तारं॥ आत्मा अहंकारो देहो वा। नतद्व्यतिरिक्तं ज्ञेयमस्तीत्याह॥ अर्थो विषयः। इंद्रियाणि तन्मा
त्रकाणि तद्रूपत्वेन। नास इति तथा तां। तथाप्यनिर्देश्यत्वमदृष्टवदत्तानरहितं॥ कृतः अन्न
ह्मोस्य देहः। अतएवाक्षरं। खमिव व्यापिनं च सर्वत्र हेतुः। यत्र यस्मिन् ध्रुवपदी जीवपदत्या २५
तिनौ छायातपौ अविद्यातत्त्वं वर्त्तिका विद्या च नास्ति। तं त्रियुगं। त्रिषु युगेषु आपि निर्विशेष

रणं व्रजाम। तदेव मविक्रियत्वादि निःसर्वज्ञत्वादि निश्वसनत्वं च वरेण्यत्वं चोक्तं। संसारचक्राधा
रत्वेनापि तदेव दर्शयन्नाह॥ ३॥ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु। त्रिणाभि
विद्युच्चलमष्टनेमिं यदक्षमाहुस्तमृतं प्रपद्ये॥ २८॥ अजस्य जीवस्य चक्रं चक्रवदावर्त्तमानं दे
हादि अजयामायया प्रेर्यमाणं। यः अच्चोपस्यपदाधिष्ठानमाहुः। तमृतं सत्यं प्रपद्ये। कथंभूतं च
क्रं मनोमयमनःप्रधानं। दशेंद्रियाणि पंच प्राणा एवमेवं पंचदश आरा यस्य। आशु शीघ्रगं। त्रयो
गुणा नाभिरिव मध्ये यस्य। विद्युदिव चलं। अष्टौ प्रकृतयो नेमय इवावरणानि यस्य। सर्वजी
वनियंतृत्वादिना च वरिष्ठत्वमाह॥ पइति॥ ४॥ य एकवर्णस्तमसःपरं तदलोकमव्यक्तमनं
तपारं॥ आसांचकारोपसुपर्णा मनसुपासते योगरथेनधीराः॥ २९॥ उपसुपर्णं जीवसमीपे
तं। नियंतृत्वेन आसांचकार। आस्ते स्म॥ यद्वा। सुपर्णः सिसृक्षाः सपायासमानं दृष्टवंतं परिषस्वजा

तइतिश्रुतेः।यद्वा।नक्रस्त्वार्थंगरुडस्योपरियउपविष्टइत्यर्थः।नर्हिदेवस्तुचाक्रुचक्रलक्षणादिक्रिया
वशात्तज्जीवसाम्यंस्यात्तत्राह।एतद्भूवर्ललिंगानिकस्वरूपं॥नमस्तेःप्रसन्नतेःपरंब्रह्मलोकंब्रह्मत्र्यं।अव्यक्तं
निर्विकल्पंअनंतपारंकालतोदेशतश्चापरिछिन्नंतद्धिभेचयः।अप्रच्युतस्वरूपचात्तज्जीवसाम्यंतत
योरन्यःपिप्पलंस्वाद्वत्त्यनश्ननन्योअभिचाकशीतिविशेषश्रवणादित्यर्थः।अतएवयंधीरायोगेन
रयेनयत्राभिसाधनेनोपासतेअजंतंतंनमामेत्यन्वयःचयः।मायानियंतृत्वेनापिजीवसाम्यंपरिहृ
रन्नवरिष्ठमाह॥२९॥नयस्यकश्चातितितर्तिमायांययाजनोमुह्यतिवेदनार्थं।तंनिर्जितात्मात्मगु
णंपरेशंनमामभूतेषुसमंचरंतं॥३०॥यस्यमायांकाश्चिकश्चिदपिनातितितर्ति।नातिक्रामितिकथं २७
स्वतो।जनोययामुह्यतिस्वर्थमात्मस्वरूपंनतुवेद।निर्जितश्चात्माआत्मनश्च।निर्मायाद्यतगुणा।स्वये
नतो।अर्थंनवेदेति।यदुक्तं।तस्यप्रपंचयन्नाह॥इमेवयंयत्प्रियायेवतन्वासत्वेनसृष्टाबहिरंतराविः

गतिंनसूक्ष्मामृषयश्चविद्महेकुतोसुराद्याइतरप्रधानाः॥३१॥इमेवयंदेवाऋषयश्चयस्यप्रियया
तन्वापत्त्वेनविसृष्टाअपिबहिरंतश्चसम्यक्प्रकाशा।आविःप्रकटमपिसूक्ष्मांगतिंनिरुपा
धिस्वरूपंनविद्मः।इतरप्रधानाः।रजस्तमोमयाः।कुतोविद्युः।तंनमामेतिपूर्वेणान्वयः।इदा
नींविराड्रूपेणस्तुवन्प्रार्थयते।पादौमहीतिद्वादशभिः।छ।पादौमहीयंस्वकृतैवयस्यचतु
र्विधोयत्रहिभूतसर्गः।सवैमहापूरुषआत्मतंत्रःप्रसीदतांब्रह्ममहाविभूतिः॥३२॥यत्रम
ह्यांजरायुजादिभूतसर्गः।सामहीपादौयस्यसनःप्रसीदतु।आत्मतंत्रःपादाविमन्वेपिनतत्प
रतंत्रः।कुतःब्रह्मअप्रच्युतस्वरूपं।तत्कुतः।महतीविभूतिरैश्वर्यंयस्यसः॥छ॥अंभस्तुयद्रे
तउदारवीर्यंसिध्यंतिजीवंत्युतवर्द्धमानाः।लोकायतोथाखिललोकपालाःप्रसीदतांब्रह्म
महाविभूतिः॥३३॥उदारवीर्यंचाक्रिर्यस्यतदंभोयस्यरेतःसनःप्रसीदतु।उदारवीर्यतामाह।

मंतो न सोलोकादयः सिध्यंति जायंते ॥ ७ ॥ सोमं मनो यस्य समामनंति दिवौकसां विश्वसमर्थ
आयुः ॥ इशो नगानां प्रजनः प्रजानां प्रसीदतां नः समद्वाचिन्नूतिः ॥ ३४ ॥ यः सोमो देवानामंधः ॥
अन्नं अन्न एव बलमायुश्च नगानां हैद्वाणां प्रकर्षेणा जनयतीति प्रजनः ॥ तं यस्य मनः समा
मनंति स प्रसीदतु ॥ ७ ॥ अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा ॥ अंतः
समुद्रे त्रपचन् स्वधाश्च स प्रसीदतां नः समद्वाचिन्नूतिः ॥ ३५ ॥ अग्निर्यस्य मुखं जातः ॥ कथं
भूतः जातवेदोथ नं यस्मात् ॥ क्रियाकांडं तस्य प्रतिपाद्यं कर्म तन्निमित्तं जन्म यस्य ॥ अंतः स
मुद्रउदरमध्ये स्वधाञ्चन्नपाकादानवाद्यादीन् ॥ प्रसिद्धसमुद्रेपि वडवानलरूपेण उदका
न्येवातु पचन्नास्ति ॥ ७ ॥ यश्चक्षुरासीत् तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यं ॥ द्वारं च २१
मुक्तेरमृतं च सृष्टिः प्रसीदतां नः समद्वाचिन्नूतिः ॥ ३६ ॥ एष तरणिर्यस्य चक्षुरासीत् ॥ कथं भू

तः देवायानं अर्चिरादिमार्ग देवता त्रयीमयः ॥ सिषात्रय्येव विधानतपतीति श्रुतेः ॥ ब्रह्मणोधिष्ण्य
उपासनास्थानं यएषोंतरादित्ये हिरण्मयः पुरुष इति श्रुतेः ॥ मुक्तेर्द्वारं ॥ देवयानचात् ॥
अमृतं च पुण्यलोकत्वात् ॥ मृत्युश्च कालात्मकत्वात् ॥ एवं भूतस्तरणिर्यस्य चक्षुः सः ॥ ७ ॥ प्रा
णादनुष्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः ॥ अन्वास्म सम्राजमिवानुगा वयं प्र
सीदतां नः समद्वाविनूतिः ॥ ३७ ॥ कथं भूतो वायुः ॥ चराचराणां सहश्च आदि धर्मवान् प्राणः ॥ यं प्रा
णं वयं बुध्याद्यधिष्ठातारो देवाः सम्राजं नृत्या इव ॥ अन्वास्म अनुपरत्यास्थिताः ॥ एवं भूतो वायुर्य
स्य प्राणादनूत् ॥ ७ ॥ श्रोत्रादिशो यस्य हृदयश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ॥ प्राणेंद्रिया
त्मासु शरीरकेतं प्रसीदतां नः समद्वाविनूतिः ॥ ३८ ॥ खानि देहगताछिद्राणि प्राणाः पंचवृत्ति
इंद्रियाणि च आत्मा मनश्च असवो नागकूर्मादयश्च शरीरं च तेषां केतं आश्रयपदं भूतं खं यस्य पु

रूपश्चनाम्न्याः प्रजज्ञे स ॥ टी ॥ बलान्महेंद्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिंच्य
खेभ्यश्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ॥ ३९ ॥ यस्य बलान्महेंद्रो ज
ज्ञे छंदांसि ऋषयश्च खेभ्यः कः प्रजापतिः ॥ टी ॥ श्रीर्वक्षसः पितरश्छायया सन् धर्मः स्तनादितरः
पृष्ठतोऽभूत् । द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रसीदतां नः स महाविभूतिः ॥ ४० ॥ इतरश्च
मः अधर्मः ॥ टी ॥ विप्रो मुखात् ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च । ऊर्वोर्विडोजोंघ्रि
रवेदशूद्रौ प्रसीदतां नः स महाविभूतिः ॥ ४१ ॥ विट् वैश्यः । ओजो नैपुण्यं तत्स्पष्टवृत्तिः । अंघ्रिः अंघ्रि
जौ इत्यर्थः । अवेदश्शूद्रौ अवेदः वेदव्यतिरिक्तः शुश्रूषादिवृत्तिः तद्वृत्तिमान् शूद्रश्च पादांतरं मु २२
गमं ॥ टी ॥ लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिः नस्तः पशव्यः स्पर्शेन कामः । भ्रुवोर्यमः पक्ष्म
भवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥ उपरि उत्तरोष्ठात् । नस्तः नासिकातो द्युतिः

कोतिः । पशव्यः पशूनां हितः कामः स्पर्शनेनाभूत् ॥ टी ॥ द्रव्यं वयः कर्म गुणान्विशेषं यद्योगमा
याविहितान्वदंति यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥ द्रव्यं भूता
नि वयः कालः विशेषं भौतिकप्रपंचं । यद्यस्मात् दुर्विभाव्यं कुतः प्रबुधापबाधं विवेकिभिर्बा
ध्यमानं पाठांतरे । प्रबुधानां मायाया अवबाधो यस्मिन्नित्यर्थः । तदेवं प्रपंचमुपवर्ण्य निःप्रपंचमु
पवर्णयन् प्रणमति नमोस्त्विति ॥ टी ॥ नमोऽस्तु तस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्
मने । गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥ ४४ ॥ वृत्तिभिरिंद्रि
यैर्नादिभिः । नभस्वान्वायुः तस्येव ऊतिर्लीला यस्य तस्मै ॥ टी ॥ स त्वं नो दर्शयात्मानमस्मत्क
रणगोचरं । प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखांबुजं ॥ ४५ ॥ ते सस्मितं मुखांबुजं दिदृक्षूणां न
अस्मच्चक्षुरादिकरणगोचरं यथा भवत्येवं प्रपंच्यात्मानं दर्शय । न केवलं त्वद्वृत्तिचं चनवबुद्धो

दृष्टमेवेत्याहनेतिरिति॥४॥तैस्तैःस्वेच्छावतीर्णरूपैःकालेकालेस्वयंविभोभगवांस्तत्करोतिदि॥
४६॥यन्नोऽविषहमस्माकंकर्मतद्भगवान्स्वयमेवंकरोतिहिनचबहिर्मुखानामिवबहूक्तानाम
स्माकंचपर्यर्पितानिपुण्यानिविपचितफलानिनचित्रमर्हतीत्याह॥४॥क्लेशभूर्यल्पसारा
णिकर्माणिविफलानिवादेहिनांविषयार्त्तानांनतथार्पितत्वयि॥४७॥क्लेशेति।भूरिषुयेषु।अ
ल्पसारंफलंयेषु॥यद्वा।विफलान्येवमकामानांकर्माणिचयथार्पितानितेनैवतथा।तत्रापिफल
मुपपादयति॥४॥नावमःकर्मकल्पोपिविफलायेश्वरार्पितः।कल्पतेपुरुषस्यैषसह्यात्माद
यितोहितः॥४८॥अवमअल्पोपिकर्मकल्पःकर्मारम्भोपिईश्वरार्पितश्चेत्॥विफलायअ २३
मायनकल्पते॥हियस्मात्सएषईश्वरःपुरुषस्यात्मा।अतएवदयितोहितश्च।नह्यात्मनिद
यितेदत्तंनवाअर्पितंनिष्फलंस्यात्।अनल्पफलंचमाह॥४॥यथाहिस्कंधशाखानांतरोर्मूले

वसेचनं।एवमाराधनंविष्णोःसर्वेषामात्मनश्चहि॥४९॥यथामूलावसेचनंस्कंधानांशाखानांचभ
वति।एवंसत्यपिचदर्पितकर्मणांबहूक्तानामस्माकंकिंनिमित्तमिदंदुःखमितिचेमेवपेक्षसी
त्याशयेनाह।नमइति॥४॥नमस्तुभ्यमनंतायदुर्वितर्क्यात्मकर्मणे॥निर्गुणायगुणेशायसत्व
स्थायचसांप्रतं॥५०॥दुर्वितर्क्याण्यात्मकर्माणिस्वभावचेष्टितानियस्यतस्मै॥४॥इतिश्रीभा
गवतेमहापुराणेअष्टमस्कंधेअमृतमथनेपंचमोध्यायः॥४॥ ॥षष्ठेपुनःस्तुतिर्विष्णो
राविर्भूतेपुरःकृता॥तन्मंत्राच्चासुरैःसाकममृतार्थमहोद्यमः॥१॥श्रीशुकउ०॥एवंस्तुतः
सुरगणैर्भगवान्हरिरीश्वरः।तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः॥१॥सहस्रार्का
णामुदयेद्युतिर्यस्य॥४॥तेनैवमहसासर्वेदेवाःप्रतिहतेक्षणाः।नापश्यन्खंदिशःक्षो
णीमात्मानंचकुतोविभुं॥२॥महसातेजसाप्रतिहतानीक्षणानिचक्षूंषियेषां॥४॥विरंच्यो

भगवान्दृष्ट्वा सहस्रार्वेणतां तत्तं । स्वच्छामरकतश्यामो कंजगर्भारुणेक्षणं ॥३॥ तामाविस्तृतां त
तुंविरंच्योदृष्ट्वा तुष्टावेति पंचमे नाध्यय: । कंजगर्भविदीर्घेक्षणे यस्या: ॥४॥ नम्रहेमावदातेन लसत्कौ
शेयवाससा । प्रसन्नचारुसर्वांगी सुमुखी सुंदरभ्रुवं ॥५॥ नम्रहेमवदवदातेन पीतेन लसता कौ
शेयवाससमा युक्तां प्रसन्नानि चारूणि सर्वाण्यंगानि यस्या: ॥६॥ ननं सुमुखं यस्या: सुंदरे भ्रुवौ य
स्या: ॥७॥ महामणिकिरिटेन केयुराभ्यां च भूषितं ॥ कर्णाभरणनिर्भातिकपोलश्रीमुखां
बुजं ॥८॥ महांतो मणयो यस्मिन्तेन किरीटेन । कर्णाभरणे कुंडले ताभ्यां निर्भातो याकपोलौ
ताभ्यां श्रीमुखांबुजं यस्या ॥९॥ कांचीकलापवलयहारनूपुरशोभितं ॥ कौस्तुभाभरणां सल २५
क्ष्मीवक्षो वनमालिनं ॥१०॥ कौस्तुभाभरणं कंठे यस्या: लक्ष्मीवक्षसि विभ्रतीं ॥११॥ सु
दर्शनादिभिस्वास्त्रैर्मूर्तिमद्भिरुपासितं । तुष्टाव देवप्रवर: सशर्वै: पुरुषं परं ॥१२॥ सर्वामरगणै:

साकं सर्वांगिरवनिंगतै: ॥१३॥ देवप्रवरो ब्रह्मा सर्वांगिरवनिंगतै: प्राष्टांगं इणतै: ॥ आनाविरास
यन्नान्नानादिति क्रचन ब्रह्मा । चिप्रति नित्यं च पितृतेनगवतनो: ॥१४॥ श्रीमूर्तेरियमाविभाव एव
न त्वस्मदादिवज्जन्मादितत्वालीत्याह ॥१५॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणाय नि
र्वाणसुखार्णवाय । अणोरणिम्नेपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥१६॥ ननातां जगन्माद
योपस्यऊत: । अगुणाय । अनो निर्वाणसुखस्यार्णवाय । अपारमोक्षसुखरूपायेत्यर्थ: । अतया
पि अणोरप्यणिम्ने शक्ष्माय । दुर्ज्ञानचात्म ॥ वस्तुतस्तु अपरिगण्यं इयंतातीतं धाम मूर्तिर्यस्य त
स्मै न वेत्तदसंगाविनं । यत: महानचिंत्योनुभावो यस्या तन्मूर्ते: सनातनत्वमपरिमेयत्वं चोप
पादयति । रूपमिति ॥१७॥ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण योगेन धात:
सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ॥१८॥ हे पुरुषर्षभ हे धात: । एतत्तव रूपं वैदितिके

नतां त्रिकेण च योगेन उपायेन श्रेयोर्थिभिः। यदाऽदृत्यं हृत्यं। अतो नेदानीमहं सर्वज्ञानमिति भावः। ननु प्र-
यं देवाः सृज्यत्वेन प्रसिद्धाः सत्यं। सार्वज्ञ्यत्वे वांतर्भूता इत्याह। उच्चैर्होदस्फटं। अस्तु किं त्वपि नो स्मान्
त्रिलोकीं स्वसदृपस्यामिते त्र हेतुः। विश्वं मूर्तौ यस्य। अतस्त्वत्वेन रूपं परिच्छिन्नमपि न भवतीति भा-
वः। विश्वमूर्तिं त्वमेवाह्वयंतीति॥छ॥ त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे।
त्वमादिरंतो जगतोस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्॥१०॥ घटस्य मृत्तिका यथा आदिरंतश्च
मध्यं च तत्तथा त्वमस्य जगतः। तत्र हेतुः। परस्मात्प्रधानादपि परः। मृत्तिकादृष्टांतेन परिणामं
प्राप्तं वारयति त्वमिति॥छ॥ त्वं माययात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः। पश्यंति २५
युक्ता मनसा मनीषिणो गुणव्यवायेप्यगुणं विपश्चितः॥११॥ स्वया स्वाधीनया। अत एव गुणानां
व्यवाये परिणामेप्यगुणमेव त्वां युक्ताः पश्यंति मनीषिणो विवेकिनः विपश्चितः शास्त्रज्ञाः। ए-

तदेव दृष्टांतमाह॥छ॥ यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिं। योगैर्मनुष्या अधियं-
ति हि त्वां गुणेषु बुद्ध्या कवयो वदंति॥१२॥ यथाग्निं काष्ठे मथनेन अमृतं गोषु दोहनादिना भु-
वि अन्नं व्रीह्यादि कर्षणादिना अंबु च खननेन उद्यमने पुरुषकारे वाणिज्यादिना वृत्तिं जीविकां।
यद्वा। अंबु नः उद्यमने घटीयंत्रादिनोद्धरणे। योगैरुपायैर्मनुष्या अधियंति प्राप्नुवंति। तथा कव-
यस्त्वां बुद्ध्या गुणेषु अधियंति वदंति च॥छ॥ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरे-
प्सितार्थं दृष्ट्वा गता निर्वृतिमद्य सर्वे ग।जादवार्त्ता इव गांगमंभः॥१३॥ हे नाथ सरोजनाभ अतिचि-
रादीप्सितमर्थं तं योगैः प्राप्यं त्वां समुज्जिहानं आविर्भवंतं प्रत्यक्षेण दृष्ट्वा। अद्य निर्वृतिं ग-
ताः। दवार्त्ताः दावाग्निपीडिताः। यद्विधेयं तत्कथयेति चेत्तत्राह॥छ॥ स त्वं विधत्स्वाखिललोक-
पाला वयं यदर्थास्तव पादमूलं समागतास्तद्बहिरंतरात्मन्। किं वान्यविज्ञाप्यमशेषसाक्षिणः।

१४॥ अंतरात्मन्नशेषसाक्षिणस्तेबहिः किंवाऽनिर्विज्ञाप्यमस्ति। स्वयमेवकिंचित्कुरुतेतिचेत्त
त्राह॥ अहमिति॥छ॥ अहंगिरित्रश्चसुरादयोयेदक्षादयोऽग्नेरिवकेतवस्ते। किंवाविदामेश
पृथग्विभाता विधत्स्वशंनोद्विजदेवमंत्रं॥१५॥ अग्नेः केतवो विस्फुलिंगाइव। तेचत्तो वयंपृथ
ग्विभाता। सतः आत्मनःश्रेयः किंवा विद्मः। अतस्त्वमेवद्विजानांदेवानांचमंत्रंविधत्स्वइदंकु
रुतेत्युपायमुपदिशेत्यर्थः॥छ॥ श्रीशुकउ॥ एवंविरिंच्यादिभिरीडितस्तद्विज्ञायतेषांहृदयंय
थैवजगादजीमूतगभीरयागिराबद्धांजलीन्संवृतसर्वकारकान्॥१६॥ हृदयंमंत्रमुपदेष्ट-
व्यमित्यभिप्रेतंयथातथैवजगादसंवृतानिनियमितानिसर्वाणिकारकाणिइंद्रियाणियैःता- २६
न्ईश्वरस्यापितथैवाभिप्रेतमित्याह॥छ॥ एकएवेश्वरस्तस्मिन्सुरकार्येसुरेश्वरः। विहर्तु-
कामस्तानाहसमुद्रोन्मथनादिभिः॥१७॥ एकएवेश्वरस्तस्मिन्समर्थोपि॥छ॥ श्रीभगवानु॥ हं

तब्रह्मन्नहोशंभोहेदेवाममभाषितं। शृणुतावहिताः सर्वेश्रेयोवःस्याद्यथासुराः॥१८॥ हेसुराहे
देवाः। अन्येचगंधर्वादयः॥छ॥ यातदानवदैतेयैस्तावत्संधिर्विधीयतां। कालेनानुगृहीतैस्तैर्या
वद्वोभवआत्मनः॥१९॥ वः आत्मनःस्वतोयावद्वोवृद्धिर्भवति॥छ॥ अरयोपिहिसंधेयाःसति-
कार्यार्थगौरवे। अहिमूषकवद्देवाह्यर्थस्यपदवींगतैः॥२०॥ अर्थस्यप्रयोजनस्यपदवींसिद्धिं
प्राप्तैः ततःपश्चादहिर्मूषकवद्वध्यघातवभावेनवर्त्तितव्यमितिशेषः। यद्वा। पेटिकायांनिरु
द्धोहिर्यथानिर्गमद्वारविधानार्थंप्रथमंमूषकेणसहसंधिंविधत्तेपश्चात्तमेवकदाचिद्भक्षयति
॥ तथाअर्थमार्गप्रवृत्तेप्रथमंसंधेयाइत्यर्थः। ततस्तैःसहयत्कार्यंतदाहअमृतोत्पादनइति॥छ॥
अमृतोत्पादनेयत्नःक्रियतामविलंबितं। यस्यपीतस्यवैजंतुर्मृत्युग्रस्तोमरोभवेत्॥२१॥ यस्या
मृतस्यपीतस्यसतः॥छ॥ क्षिप्त्वाक्षीरोदधौसर्वावीरुत्तृणलतौषधीः। मंथानंमंदरंकृत्वानेत्रं-

त्वा तु वासुकिं॥२२॥ नेत्रं रज्जुं॥ब॥ सहायेन मया देवा निर्मंथध्वमतंद्रिताः। क्लेशभाजो भविष्यंति

दैत्या यूयं फलग्रहाः॥२३॥ ननु तर्हि तेप्यमृतपानेनामरा स्युस्तत्राह। क्लेशभाज इति बलिभिः सह

कारिभिः साध्यार्थस्तदनुसरणं विना न सिध्यतीति लब्धा सामादिकमुपदिशति। यूयमिति

द्वाभ्यां॥ब॥ यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः। न संरंभेण सिध्यंति सर्वार्थाः सांत्वया यथा॥

२४॥ संरंभेण संभ्रमेण सांत्वया सामभोग्येण यया सिध्यंति॥ब॥ न भेतव्यं कालकूटाद्विषाज्ज

लधिसंभवात्। लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु॥२५॥ श्रीशुक उ०॥ इति देवान्समा

दिश्य भगवान्पुरुषोत्तमः। तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः॥२६॥ अथ तस्मै भगव २१

ते नमस्कृत्य पितामहः। भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः॥२७॥ सुरास्तु बलिमुपेयुः

उपजग्मुः॥ब॥ दृष्ट्वारीनप्यसंयत्तान्जातक्षोभान्स्वनायकान्। न्यषेधद्दैत्यराट् श्लोक्यः संधि

विग्रहकालवित्॥२८॥ असंपन्नानपि श्लोक्यः कीर्त्यर्हः॥ब॥ ते वैरोचनिमासीनं गुप्तं चासुर

यूथपैः। श्रिया परमया जुष्टं जिताशेषमुपागमन्॥२९॥ विरोचनिं बलिं जितमशेषं त्रैलोक्यं

येन तं॥ब॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महामतिः। अभ्यभाषत तत्सर्वं शिक्षितं पुरु

षोत्तमात्॥३०॥ तत्सर्वं अमृतोन्मथनादि॥ब॥ तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः। शं

बरोरिष्टनेमिश्च ये च त्रिपुरवासिनः॥३१॥ तत्र अन्ये ये च असुराधिपाः पौलोमकालेयादयः।

शंबरादयश्च तेषां च अरोचत॥ब॥ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः। उद्यमं परमं च

